भारत! । स्त्रीभोगानां विशेषज्ञः शास्त्रधर्म्मार्थतत्त्ववित् । नार्हस्त्वं सुरसङ्काश! कर्त्तुमस्वर्ग्यमीदृशम् । त्वया नृशंसकर्त्तारः पापाचाराश्च मानवाः । निग्राह्याः पार्थिवश्रेष्ठ! त्रिवर्गपरिवर्ज्जिताः। किं कृतं ते नरश्रेष्ठ! मामिहानागसं घ्नता । मुनिं मूलफलाहारं मृगवेशधरं नृप! । वसमानमरण्येषु नित्यं शमपरायणम् । त्वयाहं हिंसितो यस्मात्तस्मात्त्वामप्यहं शपे । द्वयोर्नृशंसकर्त्तारमवशं काममोहितम् । जीवितान्तकरो भाव एवमेवागमिष्यति । अहं किमिन्दमो नाम तपसा भावितो मुनिः । व्यपत्रपन्मनुष्याणां मृग्यां मैथुनमाचरम् । मृगो भूत्वा मृगैः सार्द्धं चरामि गहने वने । न तु ते ब्रह्महत्येयं भविष्यत्यविजानतः । मृगरूपधरं हत्वा मामेवं काममोहितम् । अस्य तु त्वं फलं मूढ! प्राप्स्यसीदृशमेव हि । प्रियया सह संवासं प्राप्य कामविमोहितः । त्वमप्यस्या अवस्थायां प्रेतलोकं गमिष्यसि । अन्तकाले हि संवासं यया गन्तासि कान्तया । प्रेतराजपुरं प्राप्तं सर्व्वभूतदुरत्ययम् । भक्त्या मतिमतां श्रेष्ठ! सैव त्वामनुगमिष्यति । वर्त्तमानः सुखे दुःखं यथाहं प्रापितस्त्वया । तथा त्वाञ्च सुखं प्राप्तं दुःखमभ्यागमिष्यति” । [तदपत्ये पुंस्त्री०

**किन्दर्भ** पु० ऋषिभेदे तस्यापत्यम् विदा० अञ् । कैन्दर्भ

**किन्दान** न० किञ्चिदपि दानमावश्यकं यत्र । भारतप्रसिद्धे सरकतीर्थस्थे तीर्थभेदे सरकमुपक्रम्य “किन्दाने च नरः स्नात्वा किञ्जप्ये च महीपते! । अप्रमेयमवाप्नोति दानं जप्यञ्च भारत!” भा०,व०,८३अ० ।

**किन्दास** पुं कः कुत्सितोदासः । निन्दिते दासे ततः अनार्षत्वात् अपत्ये विदा० अञ् । कैन्दास तदपत्ये पुंस्त्री० ।

**किन्धिन्** पुं कुत्सिता धीरस्त्यस्य ब्रीह्या०इनि । अस्वे त्रिका० स्त्रियां ङीप् ।

**किन्नर** पुंस्त्री कः कुत्सितो नरः तुरङ्गवदनत्वात् । देवयोनिभेदे स च पुलस्त्यर्षिपुत्रभेदः । “राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा । यक्षाश्च मनुजव्याघ्र! पुत्रास्तस्य च धीमतः” भा० आ० ६६अ० । “किन्नरान् वानरान् मत्स्यान् विविधांश्च विहङ्गमान्” मनुः स्त्रियां ङीष् । “ऋक्षीषु च तथा जाता वानराः किन्नरीषु च” रामा० । किञ्चित्क्वणत्किन्नरमध्युवास” “उद्गास्यतामिच्छति किन्नराणाम्” कुमा० । “किमिदं किन्नरकण्ठ! सुप्यते” रघुः । २वर्षभेदे च किम्पुरुषशब्दे विवृतिः ३अर्हदुपासकभेदे हेम० ।

**किन्नरेश** पुं ६त० । कुवेरे तस्य तदधिपत्वकथा काशी० ख० १२अ०यथा “वरं ददामि ते वत्स! तपसाऽनेन तोषितः । निधीनामधिनाथस्त्वं गुह्यकानामपीश्वरः । यक्षाणां किन्नराणाञ्च राजा राज्ञाञ्च सुव्रत! । पतिः पुण्यजनानाञ्च सर्व्वेषां धनदोभव” किन्नरेश्वरादयोऽप्यत्र

**किन्नु** अव्य० किञ्च नु च द्व० । १प्रश्ने, २वितर्कें ३सादृश्ये ४स्थाने च जटाधरः पदद्वयमित्येके ।

**किप्य** पु० सुश्रुतोक्ते पुरीषजे कृमिभेदे । “अजवा विजवाः किप्याश्चिप्या गण्डूपदास्तथा । चुरवोद्विमुखाश्चैव सप्तैवैते पुरीषजाः” सुश्रु० ।

**किम्** त्रि०कु-शब्दे बा०डिमु । १कुत्सिते २जिज्ञासिते ३वितर्कविषये । ४कुत्सायां ५गर्हणे ६वितर्के ७प्रश्ने ८सादृश्ये, (प्रकारे) ९करणे च अव्य०जटा० १०ईषदर्थे ११अतिशये गणरत्नम् । तत्र त्रिलिङ्गस्य सर्व्वनामता के कस्मै इत्यादि “के यूयं स्थल एव संप्रति वयं प्रश्नोविशेषाश्रयः” सा०द० । “कस्मै नाथ! समर्प्य कौरवकुलं व्योमान्तमालम्बसे” उद्भटः । “केषां नैषा भवति कविता कामिनी कौतुकाय” प्रसन्नरा० । “कस्मिंश्चिद्वनोद्देशे भासुरकोनाम सिंहः प्रतिवसति” पञ्चतन्त्रम् । “कस्मिन्नु खलु विज्ञाते सर्वं विज्ञातं भवति” मुण्डकश्रुतिः । निन्दितार्थे किंराजा किङ्गौः इत्यादि । “किंराजा यो न रक्षति” “स किंसखा साधु न शास्ति योऽधिपम्” किरा० इत्यादि तत्र ईषदर्थे न किमप्यस्यास्ति । किञ्चिदपि नास्तीत्यर्थः अतिशये किमप्येष प्रगल्भसे अतिशयितं प्रगल्भसे इत्यर्थः अव्ययस्य प्रश्ने “किमिदं किन्नरकण्ठ सुप्यते” रघुः तत्र किंशब्दशक्तिबोधादिप्रकारो गदाधरेण शक्तिवादे दर्शितो यथा ।

“किंपदस्य जिज्ञासिते शक्तिः एतदेव स्वीयजिज्ञासाज्ञापनाय किंपदघटितप्रश्नवाक्यं प्रयुज्यते । ततोहि स्ववाचककिंपदस्य समभिव्याहृतपदोपस्थाप्यतावच्छेदकधर्मावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन वक्तृजिज्ञासितो धर्मः प्रवृत्तिनिमित्तं उपस्थाप्यतावच्छेदकत्वान्तमुपलक्षणतयानुगमकं शाब्दबोधे तदभानात् । एवञ्च कः पचतीत्यतः पाककृतित्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन जिज्ञासितो यो धर्म्मस्तद्वान्पचतीत्याकारोऽन्वयबोधः प्रतिपाद्यते किञ्चिद्धर्मावच्छिन्नोद्देश्यतानिरूपितपाककृतित्वावच्छिन्नविधेयताशालिज्ञानं भवत्वित्याकारिकाया जिज्ञासायास्तादृशबोधविषयकतया